# का शि का

## अष्टमोऽध्यायः

### प्रथमः पादः

### सर्वस्य द्वे। (१/२१३९)

सर्वस्य इति च द्वे इति चैतधिकृतं वेदितव्यम् । इत उत्तरं यद् वक्ष्यामः 'पदस्य' (८. १. १६/४०१) इत्यतः प्राक्, सर्वस्य द्वे भवतः इत्येवं तद् वेदितव्यम् । वक्ष्यति –'नित्यवीप्सयोः' (८. १. ४/२१४०) इति, तत्र सर्वस्य स्थाने द्वे भवतः । के द्वे भवतः ? ये शब्दतश्चार्थतश्च [1]उभयथान्तरतमे । एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः । पचति पचति । ग्रामो ग्रामो रमणीयः । यदा तु द्विः प्रयोगो द्विर्वचनम् तदा स एव [2]पचतिशब्दो द्विरावर्तते, तस्य द्वे आवृत्ती भवतः । सर्वस्य इति किम् ? विस्पष्टार्थम् । अथ पदस्य इत्येव कस्मान् नोच्यते ? नैवं शक्यम्, इह हि न स्यात् प्रपचति प्रपचति इति । इह द्रोग्धा, द्रोढा इति घत्वढत्वयोः असिद्धत्वादकृतयोरेव तयोर्द्विवचनं प्राप्नोति, तत्र पश्चाद्विकल्पे सत्यनिष्टमपि स्यात् द्रोग्धा द्रोढा, द्रोढा द्रोग्धा इति। तस्माद् वक्तव्यमेतत् 'पूर्वत्रासिद्धीयमद्विर्वचने' (पु. प. ९२) इति। सर्वस्य इत्येतदेव वा कृतं सर्वकार्य-प्रतिपत्त्यर्थं द्रष्टव्यम् ॥

### तस्य परमाम्रेडितम् । (२/८३)

तस्य द्विरुक्तस्य यत् परं [3]शब्दरूपं तद् आम्रेडितसञ्ज्ञं भवति। चौर चौर ३, वृषल वृषल ३, दस्यो दस्यो ३ [4]घातयिष्यामि त्वा, [5]बन्धयिष्यामि त्वा। आम्रेडितप्रदेशाः –'आम्रेडितं भर्त्सने' (८. २. ९५/३६१४) इत्येवमादयः ॥

### अनुदात्तं च। (३/३६७०)

अनुदात्तं च तद् भवति यदाम्रेडितसञ्ज्ञम् । भुङ्क्ते भुङ्क्ते । पशून् पशून् ॥

### नित्यवीप्सयोः। (४/२१४०)

नित्ये चार्थे वीप्सायां [6]च यद् वर्तते तस्य द्वे भवतः । [7]केषु नित्यता ? तिङक्षु नित्यता अव्ययकृत्सु च। कुत एतत्? आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः । यां क्रियां कर्ता प्राधान्येनानुपरमन् करोति तन् नित्यम् । पचति पचति । जल्पति जल्पति । भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति । लुनीहि लुनीहि इत्येवायं लुनाति।

---

1. उभयथा नास्ति इ.ह. 2. पचति नास्ति इ. 3. रूपं इ. 4. ताडयिष्यामि ह. 5. बन्धयिष्यामि त्वा नास्ति इ. 6. चार्थे ड. 7. अथ इत्यधिकम् ह.